कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ सप्तम काण्डे द्वितीयः प्रश्नः॥

हरिः ओम्॥ साध्या वै देवाः सुवर्गकामा एतग्ं षड्रात्रमपश्यन्तमाऽहरन्तेनाऽयजन्त ततो वै ते सुवर्गँल्लोकमायन् य एवं विद्वाग्ंसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति देवसत्त्रं वै षड्रात्रः प्रत्यक्षग्ग् ह्येतानि पृष्ठानि य एवं विद्वाग्ंसः षड्रात्रमासते साक्षादेव देवता अभ्यारोहन्ति षड्रात्रो भवति षड्वा ऋतवष्षट्पृष्ठानि [१] पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यङ्ञस्याऽञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकं यन्ति त्रिवृदग्निष्टोमो भवति तेज एवाऽव रुन्धते पञ्चदशो भवतीन्द्रियमेवाऽव रुन्धते सप्तदशो [२] भवत्यन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायन्त एकविग्ंशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते त्रिणवो भवति विजित्यै त्रयस्त्रिग्ंशो भवति प्रतिष्ठित्यै सदोहविर्धानिन एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानञ्चाऽऽग्नीध्रं च भवतस्तद्धि सुवर्ग्यं चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङिव हि सुवर्गो [३] लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवाऽन्वारोहन्त्याक्रोशन्तो यान्त्यवर्तिमेवाऽन्यस्मिन्प्रतिषज्य प्रतिष्ठाङ्गच्छन्ति यदा दश शतं कुर्वन्त्यथैकमुत्थानग्ं शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठन्ति यदा शतग्ं सहस्रं कुर्वन्त्यथैकमुत्थानग्ं सहस्रसंमितो

वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम्॥[४]

पृष्ठानि सप्तदशस्सुवर्गो जयन्ति यदैकादश च॥7.2.1॥

कुसुरुबिन्द औद्दालकिरकामयत पशुमान्थ्स्यामिति स एतग्ं सप्तरात्रमाऽहरत्तेनाऽयजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवाऽरुन्ध य एवं विद्वान्थ्सप्तरात्रेण यजते यावन्त एव ग्राम्याः पशवस्तानेवाऽव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाग्स्युभयस्यावरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेज [५] एवाऽव रुन्धे पञ्चदशो भवतीन्द्रियमेवाऽव रुन्धे सप्तदशो भवत्यन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायत एकविग्ंशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै पञ्चविग्ंशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्याऽवरुद्ध्यै विश्वजिथ्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याऽभिजित्यै यत्प्रत्यक्षं पूर्वेष्वहस्सु पृष्ठान्युपेयुः प्रत्यक्षं [६] विश्वजिति यथा दुग्धामुपसीदत्येवमुत्तममहः स्यान्नैकरात्रश्चन स्याद्बृहद्रथन्तरे पूर्वेष्वहःसूप यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत्प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव तत्॥[७]

तेज अपेयुः प्रत्यक्षन्द्विचत्वारिग्ंशच्च॥7.2.2॥

बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै स ब्रह्मवर्चस्यभवद्य एवं विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरारो

भवत्यष्टाक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धेऽष्टरात्रो भवति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे [८] त्रिवृदग्निष्टोमो भवति तेज एवाऽव रुन्धे पञ्चदशो भवतीन्द्रियमेवाऽव रुन्धे सप्तदशो भवत्यन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायत एकविग्ंशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिग्ंशो भवति प्रतिष्ठित्यै पञ्चविग्ंशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्याऽवरुद्ध्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याऽभिजित्यै॥[९]

दिज्भ्य एव ब्रह्मवर्चसमव रुन्धेऽभिजित्यै||7.2.3||

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्थ्स एतं नवरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधं निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासां लोका अक्लुप्ता अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान्कल्पयति तान्कल्पमानान्प्रजाभ्योऽनु कल्पते कल्पन्ते [१०] ऽस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं लोकङ्कल्पयति त्रिरात्त्रेणाऽन्तरिक्षं त्रिरात्रेणाऽमुँल्लोकं यथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलम्भावाय ज्योतिर्गौरायुरिति ङ्ञाता स्तोमा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ङ्ञात्रं प्रजाना- [११] ङ्गच्छति नवरात्रो भवत्यभिपूर्वमेवाऽस्मिन्तेजो दधाति यो ज्योगामयावी स्याथ्स नवरात्रेण यजेत प्राणा हि वा एतस्याऽधृता अथैतस्य ज्योगामयति प्राणानेवाऽस्मिन्दाधारोत यदीतासुर्भवति जीवत्येव॥[१२]

कल्पन्त् प्रजानान्त्रयस्त्रिग्ंशच्च॥7.2.4॥

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत्तमजुहोत्तेन दशरात्रमसृजत तेन दशरात्रेण प्राऽजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रैव दशरात्रग्ं सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यङ्ञो यद्दशरात्रो य एवं विद्वान्दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यङ्ञो यद्दशरात्रो [१३] य एवं विद्वान्दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ्देवताभिरासीथ्स न व्यावृतमगच्छथ्स प्रजापतिमुपाऽधावत्तस्मा एतं दशरात्रं प्राऽयच्छत्तमाऽहरत्तेनाऽयजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान्दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद्वा [१४] एष यङ्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविग्ंशः ककुत्त्रयस्त्रिग्ंशो य एवं विद्वान्दशरात्रेण यजते त्रिककुदेव समानानाम्भवति यजमानः पञ्चदशो यजमान एकविग्ंशो यजमानस्त्रयस्त्रिग्ंशः पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्थ्स्तृणुते देवासुराः संयत्ता आसन्ते देवा एताः [१५] देवपुरा अपश्यन् यद्दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधोऽभवत्ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्थ्स्याथ्स दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोम स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिङ्कुरुते जामि वा [१६] एतत्कुर्वन्ति यज्ज्यायाग्ंसग्ग् स्तोममुपेत्य कनीयाग्ंसमुपयन्ति यदग्निष्टोमसामान्यवस्ताच्च परस्ताच्च भवन्त्यजामित्वाय त्रिवृदग्निष्टोमोऽग्निष्टुदाग्नेयीषु भवति तेज एवाऽव रुन्धे

पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाऽव रुन्धे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाऽव रुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायत [१७] एकविग्ंश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्य उपहवमेव गच्छति त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रिग्ंश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याऽभिजित्यै॥[१८]

प्राजापत्यो वा एष यज्ञो यद्दशरात्रस्त्रिककुद्वा एता वै जायत एकत्रिग्ंशच्च॥7.2.5॥

ऋतवो वै प्रजाकामाः प्रजान्नाऽविन्दन्त तेऽकामयन्त प्रजाग्ं सृजेमहि प्रजामव रुन्धीमहि प्रजां विन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रमपश्यन्तमाऽहरन्तेनाऽयजन्त ततो वै ते प्रजामसृजन्त प्रजामवाऽरुन्धत प्रजामविन्दन्त प्रजावन्तोऽभवन्त ऋतवोऽभवन्तदार्तवानामार्तवत्वमृतूनां वा एते पुत्रास्तस्मा- [१९] दार्तवा उच्यन्ते य एवं विद्वाग्ंस एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां विन्दन्ते प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्याऽनुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव प्रति तिष्ठन्ति चतुर्विग्ंशो भवति चतुर्विग्ंशत्यक्षरा गायत्री [२०] गायत्रम्ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारिग्ंशो भवति चतुश्चत्वारिग्ंशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप्त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्त्यष्टाचत्वारिग्ंशो भवत्यष्टाचत्वारिग्ंशदक्षरा जगती

जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्येकादशरात्रो भवति पञ्च वा ऋतव आर्तवाः पञ्चर्तुष्वेवाऽऽर्तवेषु संवथ्सरे प्रतिष्ठाय प्रजामव रुन्धतेऽतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै॥[२१]

तस्माद्गायत्र्येकान्न पञ्चाशच्च॥7.2.6॥

ऐन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यङ्ञस्य वै क्लुप्तिमनु प्रजाः कल्पन्ते यङ्ञस्याऽक्लुप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायाग्ंसङ्कनीयानति क्रामत्यैन्द्रवायवाग्रान्गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्याऽऽमयति प्राण ऐन्द्रवायवः प्राणेनैवैनग्ं समर्धयति मैत्रावरुणाग्रान्गृह्णीरन् येषान्दीक्षितानां प्रमीयेत [२२] प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान्गृह्णीताऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ पश्चेवाऽग्रं पर्यैतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परि णयतः शुक्राग्रान्गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः [२३] श्रियै गत्त्वा नि वर्ततेऽन्तादेवाऽन्तमा रभते न ततः पापीयान्भवति मन्थ्यग्रान्गृह्णीताऽभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनङ्ग्राहयति ताजगार्तिमार्छत्याग्रयणाग्रान्गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो [२४] भवत्यथ तन्न प्राप्नोत्युर इवैतद्यङ्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान्भवत्युऽक्थ्याग्रान्गृह्णीताऽभिचर्यमाणः सर्वेषां वा एतत्पात्राणामिन्द्रियं

यदुक्थ्यपात्रग्ं सर्वेणैवैनमिन्द्रियेणाऽति प्र युङ्क्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै [२५] सरस्वती वाचैवैनमति प्र युङ्क्ते मा त्वत्क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान्ग्रहान्गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्याऽऽमयति प्राणा ग्रहाः प्राणानेवाऽस्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान्ग्रहान्गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत्प्राणान् वा एतर्हिप्रजानाग्ं शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानाग्ं शुचो मुञ्चति ताजक्प्र वर्षति॥[२६]

प्रमीयेत मनुष्य ऋध्यते यस्य पिता पितामहः पुण्यो वाग्वा एव पूर्णान्ग्रहान्पञ्चविग्ंशतिश्च||**7.2.7**||

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमहस्तस्मात्प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमहस्तस्माद्द्वितीयेऽहऽङ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात्तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै [२७] यङ्ञमापद्यच्छन्दाग्स्याप्नोति यदाग्रयणः श्नो गृह्यते यत्रैव यङ्ञमदृशन्तत एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्वएवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते राथंतरो वा ऐन्द्रवायवो राथंतरं पञ्चममहस्तस्मात्पञ्चमेऽह- [२८] न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हतग्ं षष्ठमहस्तस्मात्षष्ठेऽहऽङ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयं यङ्ञमापद्यच्छन्दाग्स्याप्नोति यच्छुक्रः श्नो

गृह्यते यत्रैव यङ्ञमदृशान्तत एवैनं पुनः प्र युङ्क्ते त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः [२९] शुक्रो यथ्सप्तमेऽहङ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्येत- [३०] द्वै तृतीयं यङ्ञमापद्यच्छन्दाग्स्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यङ्ञमदृशान्तत एवैनं पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात्प्रतिपद्यन्तेऽन्तः खलु वा एष यङ्ञस्य यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यङ्ञस्यै- [३१] वान्तङ्गत्वाऽपथात्पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं वहन्ति तादृगेव तच्छन्दाग्स्यन्योऽन्यस्य लोकमभ्यध्यायन्तान्येतेनैव देवा व्यवाहयन्नैन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहस्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽयतने नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं यत्पञ्चम- [३२] महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽयतने सप्तमेऽहङ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनं यत्षष्ठमहस्तस्मिङ्छुक्रो गृह्यते तस्माच्छुक्रस्याऽऽयतनेऽष्टमेऽहन्नाग्रयणो गृह्यते छन्दाग्स्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं वेदाऽथो देवताभ्य एव यङ्ञे संविदं दधाति तस्मादिदमन्योऽन्यस्मै दधाति॥[३३]

एतद्वै पञ्चमेऽहन्त्रैष्टुभ एतद्गृह्यते यज्ञस्य पञ्चममन्यस्मा एकञ्च॥7.2.8॥

गायत्रस्त्रैष्टुभो जगत एतदाग्रयणो जगन्मुखोऽथो स्वग्ं राथन्तरो बार्हत एतद्वै द्वितीयग्ं शुक्रस्त्रिष्टुङ्मुखोऽथो

वाक्प्राण एतत्तृतीयमैन्द्रवायवोऽथो पथो वै दशमं यज्ञस्य चतुर्थमाग्रयणो नवम ऐन्द्रवायवꣳशुक्रस्य पञ्चममैन्द्रवायवस्सप्तमे शुक्रꣳशुक्र आग्रयणो यथ्षष्ठमष्टमेऽहञ्छन्दाग्ंसि (स्सप्तमे शुक्रो यथ्षष्ठग्ं शुक्रोऽष्टमेऽहन्नाग्रयणꣳछन्दाग्ंसि)॥

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै स प्राऽजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यङ्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यङ्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ य- [३४] दग्निष्टोमं पूर्वं प्रयुञ्जीरन्बहिर्धा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यङ्ञे धित्वा मध्यतः कनीनिके प्रति दधति यो वै गायत्रीं ज्योतिःपक्षां वेद ज्योतिषा भासा सुवर्गँल्लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा सुवर्गँल्लोक- [३५] मेति प्रजापतिर्वा एष द्वादशधा विहितो यद्द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्थ्सद्ध वै सत्त्रेण स्पृणोति प्राणा वै सत्प्राणानेव स्पृणोति सर्वासां वा एते प्रजानां प्राणैरासते ये सत्त्रमासते तस्मात्पृच्छन्ति किमेते सत्त्रिण इति प्रियः प्रजानामुत्थितो भवति य एवं वेद॥[३६]

अग्निष्टोमौ यथ्सुवर्गँल्लोकं प्रियः प्रजानां पञ्च च॥7.2.9॥

न वा एषोऽन्यतो वैश्वानरः सुवर्गाय लोकाय प्राऽभदूर्ध्वो ह वा एष आतत आसीत्ते देवा एतं वैश्वानरं पर्यौहन्थ्सुवर्गस्य लोकस्य प्र भूत्या ऋतवो वा एतेन

प्रजापतिमयाजयन्तेष्वाध्नोदधि तदृध्नोति ह वा ऋत्विक्षु य एवं विद्वान्द्वादशाहेन यजते तेऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्राऽयच्छ– [३७] द्यवङ्ग्रीष्मायौषधीर्वर्षाभ्यो व्रीहीङ्छरदे माषतिलौ हेमन्तशिशिराभ्यां तेनेन्द्रं प्रजापतिरयाजयत्ततो वा इन्द्र इन्द्रोऽभवत्तस्मादाहुरानुजावरस्य यङ्ञ इति स ह्येतेनाऽग्रेऽयजतैष ह वै कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपङ्गौर्वा अन्नं येन पात्रेणाऽन्नं बिभ्रति यत्तन्न निर्णेनिजति ततोऽधि [३८] मलञ्जायत एक एव यजेतैको हि प्रजापतिराध्नोद्द्वादश रात्रीर्दीक्षितः स्याद्द्वादश मासाः संवथ्सरः संवथ्सरः प्रजापतिः प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि जायते चतुर्धा वा एतास्तिस्त्रस्तिस्त्रो रात्रयो यद्द्वादशोऽपसदो याः प्रथमा यङ्ञं ताभिः सम्भरति या द्वितीया यङ्ञं ताभिरा रभते [३९] यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः शुन्धते यो वा अस्य पशुमत्ति माग्ंसग्ं सोऽत्ति यः पुरोडाशं मस्तिष्कग्ं स यः परिवापं पुरीषग्ं स य आज्यं मज्जानग्ं स यस्सोमग्ग् स्वेदग्ं सोऽपि ह वा अस्य शीर्षण्या निष्पदः प्रति गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद्द्वादशाहेन न याज्यं पाप्मनो व्यावृत्त्यै॥[४०]

अयच्छदधि रभते द्वादशायेन चत्वारि च||7.2.10||

एकस्मै स्वाहा द्वाभ्याग् स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहाऽष्टादशभ्यः स्वाहैकान्न

विग्ंशत्यै स्वाहा नवविग्ंशत्यै स्वाहैकान्न चत्वारिग्ंशते स्वाहा नवचत्वारिग्ंशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाऽशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा द्वाभ्याग्ं शताभ्याग् स्वाहा सर्वस्मै स्वाहा॥[४१]

नवचत्वारिग्ंशते स्वाहैकान्नैकविग्ंशतिश्च॥7.2.11॥

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विग्ंशत्यै स्वाहा नवविग्ंशत्यै स्वाहैकान्न चत्वारिग्ंशते स्वाहा नवचत्वारिग्ंशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाऽशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४२]

एकस्मै त्रिभ्यः पञ्चाशत्॥7.2.12॥

द्वाभ्याग् स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहाऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा विग्ंशत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४३]

द्वाभ्यामष्टानवत्यै षड्विग्ंशतिः॥7.2.13॥

त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विग्ंशत्यै स्वाहा नवविग्ंशत्यै स्वाहैकान्न चत्वारिग्ंशते स्वाहा नवचत्वारिग्ंशते स्वाहैकान्न षष्ट्यै

स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४४]

त्रिभ्यऽष्टाचत्वारिग्ंशत्॥7.2.14॥

चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विग्ंशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४५]

चतुर्भ्यष्षण्णवत्यै षोडश॥7.2.15॥

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विग्ंशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४६]

पञ्चभ्यः पञ्चनवत्यै चतुर्दश॥7.2.16॥

दशभ्यः स्वाहा विग्ंशत्यै स्वाहा त्रिग्ंशते स्वाहा चत्वारिग्ंशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४७]

दषभ्यो द्वाविग्ंशतिः॥7.2.17॥

विग्ंशत्यै स्वाहा चत्वारिग्ंशते स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा॥[४८]

विग्ंशत्यै द्वादश॥7.2.18॥

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याग्ं शताभ्याग् स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहासर्वं स्मै स्वाहा॥[४९]

*पञ्चाशते द्वात्रिग्ंशत्॥**7.2.19***॥

शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहाऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहाऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहासर्वस्मै स्वाहा॥[५०]

*शतायाऽष्टात्रिग्ंशत्॥**7.2.20***॥

*साध्याष्षडात्रङ्गुसुरुबिन्दस्सप्तरात्रं बृहस्पतिरष्टरात्रं प्रजापतिस्ताः क्षुधन्नवरात्रं प्रजापतिरकामयत दशहोतारमृतव ऐन्द्रवायवाग्रान्गायत्रो वै प्रजापतिस्स द्वादशरात्रन वा एकस्मा एकस्मै द्वाभ्यान्त्रिभ्यश्चतुर्भ्यः पञ्चभ्यो दशभ्यो विग्ंशत्यै पञ्चाशते शताय विग्ंशतिः॥**20***॥*

साध्या अस्मा इमे लोका गायत्रं वै तृटीयमेकस्मै पञ्चाशत्॥५०॥

साध्यास्सर्वस्मै स्वाहा॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति सप्तम काण्डे द्वितीयः प्रश्नः॥